रुद् + शतृ = रुदन् (पुं०), (रुदन्ती स्त्री०)

सन्नन्त—रुरुदिषति

श्वस् = साँस लेना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	श्वसिति	श्वसितः	श्वसन्ति
मध्यम पुरुष	श्वसिषि	श्वसिथः	श्वसिथ
उत्तम पुरुष	श्वसिमि	श्वसिवः	श्वसिमः

लृट्—भविष्यत्काल

प्रथम पुरुष	श्वसिष्यति	श्वसिष्यतः	श्वसिष्यन्ति
मध्यम पुरुष	श्वसिष्यसि	श्वसिष्यथः	श्वसिष्यथ
उत्तम पुरुष	श्वसिष्यामि	श्वसिष्यावः	श्वसिष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	श्वसितु	श्वसिताम्	श्वसन्तु
मध्यम पुरुष	श्वसिहि	श्वसितम्	श्वसित
उत्तम पुरुष	श्वसानि	श्वसाव	श्वसाम

लङ्—भूतकाल

प्रथम पुरुष	अश्वसत् (अश्वसीत्)	अश्वसिताम्	अश्वसन्
मध्यम पुरुष	अश्वसः (अश्वसीः)	अश्वसितम्	अश्वसित
उत्तम पुरुष	अश्वसम्	अश्वसिव	अश्वसिम

विधिलिङ् लकार

प्रथम पुरुष	श्वस्यात्	श्वस्याताम्	श्वस्युः
मध्यम पुरुष	श्वस्याः	श्वस्यात	श्वस्यात
उत्तम पुरुष	श्वस्याम्	श्वस्याव	श्वस्याम

कृदन्तान्त रूप-रचना—

श्वस् + क्त = श्वसितः (-ता, -तम्)

श्वस् + क्तवत् = श्वसितवान् (-वती)

श्वस् + क्त्वा = श्वसित्वा

श्वस् + तुम् = श्वसितुम्

श्वस् + तव्य = श्वसितव्यः (-व्या)

प्रेरणार्थक—श्वासयति—ते

भाववाच्य—श्वस्यते

सोपसर्ग प्रयोग—

वि + श्वस् = विश्वसिति = विश्वास करता है।

प्र + श्वस् = प्रश्वसिति = साँस बाहर निकालता है।

श्वस् + अनीय = श्वसनीयः (-या)
श्वस् + शतृ = श्वसत्

निः + श्वस् = दुःख भरी सांस लेना।
उत् + श्वस् = ऊंची सांस लेना

स्वप् = सोना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	स्वपिति	स्वपितः	स्वपन्ति
मध्यम पुरुष	स्वपिषि	स्वपिथः	स्वपिथ
उत्तम पुरुष	स्वपिमि	स्वपिवः	स्वपिमः

लृट्—भविष्यत्काल

प्रथम पुरुष	स्वप्स्यति	स्वप्स्यतः	स्वप्स्यन्ति
मध्यम पुरुष	स्वप्स्यसि	स्वप्स्यथः	स्वप्स्यथ
उत्तम पुरुष	स्वप्स्यामि	स्वप्स्यावः	स्वप्स्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	स्वपितु	स्वपिताम्	स्वपन्तु
मध्यम पुरुष	स्वपिहि	स्वपितम्	स्वपित
उत्तम पुरुष	स्वपानि	स्वपाव	स्वपाम

लङ्—भूतकाल

प्रथम पुरुष	अस्वपत् (अस्वपीत्)	अस्वपिताम्	अस्वपन्
मध्यम पुरुष	अस्वपः (अस्वपीः)	अस्वपितम्	अस्वपित
उत्तम पुरुष	अस्वपम्	अस्वपिव	अस्वपिम

विधिलिङ् लकार

प्रथम पुरुष	स्वप्यात्	स्वप्याताम्	स्वप्युः
मध्यम पुरुष	स्वप्याः	स्वप्यातम्	स्वप्यात
उत्तम पुरुष	स्वप्याम्	स्वप्याव	स्वप्याम

कृदन्तान्त रूप रचना—

स्वप् + क्त = सुप्तः (सुप्ता, सुप्तम्)
स्वप् + क्तवत् = सुप्तवान् (-वती, -वत्)
स्वप् + क्त्वा = सुप्त्वा
स्वप् + तुम् = स्वप्तुम्
स्वप् + तव्यः = स्वप्तव्यः (-तव्या-तव्यम्)
स्वप् + अनीय = स्वपनीय (-नीया,-नीयम्)
स्वप् + शतृ = स्वपन् (स्वपन्ती, स्वपत्)

प्रेरणार्थक—स्वापयति—ते
भाववाच्य—सुप्यते
सन्नन्त—सुषुप्सति।

जागृ=जागना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	जागर्ति	जागृतः	जाग्रति
मध्यम पुरुष	जागर्षि	जागृथः	जागृथ
उत्तम पुरुष	जागर्मि	जागृवः	जागृमः

लृट्—भविष्यत्काल

प्रथम पुरुष	जागरिष्यति	जागरिष्यतः	जागरिष्यन्ति
मध्यम पुरुष	जागरिष्यसि	जागरिष्यथः	जागरिष्यथ
उत्तम पुरुष	जागरिष्यामि	जागरिष्यावः	जागरिष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	जागर्तु	जागृताम्	जाग्रतु
मध्यम पुरुष	जागृहि	जागृतम्	जागृत
उत्तम पुरुष	जागराणि	जागराव	जागराम

लङ्—भूतकाल

प्रथम पुरुष	अजागः	अजागृताम्	अजागरुः
मध्यम पुरुष	अजागः	अजागृतम्	अजागृत
उत्तम पुरुष	अजागरम्	अजागृव	अजागृम

विधिलिङ् लकार

प्रथम पुरुष	जागृयात्	जागृयाताम्	जागृयुः
मध्यम पुरुष	जागृयाः	जागृयातम्	जागृयात
उत्तम पुरुष	जागृयाम्	जागृयाव	जागृयाम

कृदन्तान्त रूपरचना—

जागृ+क्त=जागरितः (-ता,—तम्) प्रेरणार्थक—जागरयति—ते

जागृ+क्तवत्=जागृतवान् (-वती,-वत्) भाववाच्य—जागर्यते

जागृ+क्त्वा=जागरित्वा सन्नन्त—जिजागरिषति

जागृ+तुम्=जागरितुम्

जागृ+तव्य=जागरितव्यः (व्या, व्यम्)

जागृ+अनीय=जागरणीयः

जागृ+शतृ=जाग्रत् (जाग्रत्, जाग्रती, जाग्रत्)

इ=जाना, पहुँचना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	एति	इतः	यन्ति
मध्यम पुरुष	एषि	इथः	इथ
उत्तम पुरुष	एमि	इवः	इमः

लृट्—भविष्यत्काल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	एष्यति	एष्यतः	एष्यन्ति
मध्यम पुरुष	एष्यसि	एष्यथः	एष्यथ
उत्तम पुरुष	एष्यामि	एष्यावः	एष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	एतु	इताम्	यन्तु
मध्यम पुरुष	एहि	इतम्	इत
उत्तम पुरुष	अयानि	अयाव	अयाम

लङ्—भूतकाल

प्रथम पुरुष	ऐत्	ऐताम्	आयन्
मध्यम पुरुष	ऐः	ऐतम्	ऐत
उत्तम पुरुष	आयम्	ऐव	ऐम

विधिलिङ् लकार

प्रथम पुरुष	इयात्	इयाताम्	इयुः
मध्यम पुरुष	इयाः	इयातम्	इयात
उत्तम पुरुष	इयाम्	इयाव	इयाम

कृदन्तान्त रुप-रचना—

इ+क्त=इतः (इता, इतम्) प्रेरणार्थक—गमयति

इ+क्तवत्=इतवान् (-वती,-वत्) कर्मवाच्य—ईयते

इ+क्त्वा=इत्वा सन्नन्त—जिगमिषति

ज्ञातव्य—नीचे दी गई विद् धातु के वर्तमानकाल में दो-दो रूप बनते हैं।

विद्=जानना

लट्—वर्तमानकाल

प्रथम पुरुष	वेत्ति (वेद)	वित्तः (विदतुः)	विदन्ति (विदुः)
मध्यम पुरुष	वेत्सि (वेत्थ)	वित्थद(ःवि थुः)	वित्थ (विद)
उत्तम पुरुष	वेद्मि (वेद)	विद्वः (विद्व)	विद्मः (विद्म)

लृट्—भविष्यत्काल

प्रथम पुरुष	वेदिष्यति	वेदिष्यतः	वेदिष्यन्ति
मध्यम पुरुष	वेदिष्यसि	वेदिष्यथः	वेदिष्यथ
उत्तम पुरुष	वेदिष्यामि	वेदिष्यावः	वेदिष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	वेत्तु	वित्ताम्	विदन्तु
मध्यम पुरुष	विद्धि	वित्तम्	वित्त
उत्तम पुरुष	वेदानि	वेदाव	वेदाम

लङ्—भूतकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अवेत्-द्	अविताम्	अविदुः
मध्यम पुरुष	अवेत्, अवेः	अवित्तम्	अवित्त
उत्तम पुरुष	अवेदम्	अविद्व	अविद्म

विधिलिङ् लकार

प्रथम पुरुष	विद्यात्	विद्याताम्	विद्युः
मध्यम पुरुष	विद्याः	विद्यातम्	विद्यात
उत्तम पुरुष	विद्याम्	विद्याव	विद्याम

कृदन्तान्त रूप-रचना—

विद्+क्त=विदितः (विदिता, विदितम्) प्रेरणार्थक—वेदयति-ते

विद्+क्तवत्=विदितवान् (-वती,-वत्) कर्मवाच्य—विद्यते

विद्+क्त्वा=विदित्वा सन्नन्त—विविदिषति

विद्+तव्य=वेदितव्यः (वेदितव्यम्)

विद्+अनीय=वेदनीयः (वेदनीया; वेदनीयम्)

विद्+शतृ=विदन् (विदती, विदत्)

शास्=शासन करना

लट्—वर्तमानकाल

प्रथम पुरुष	शास्ति	शिष्टः	शासति
मध्यम पुरुष	शास्सि	शिष्ठः	शिष्ठ
उत्तम पुरुष	शास्मि	शिष्वः	शिष्मः

लृट्—भविष्यत्काल

प्रथम पुरुष	शासिष्यति	शासिष्यतः	शासिष्यन्ति
मध्यम पुरुष	शासिष्यसि	शासिष्यथः	शासिष्यथ
उत्तम पुरुष	शासिष्यामि	शासिष्यावः	शासिष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	शास्तु	शिष्टाम्	शासतु
मध्यम पुरुष	शाधि	शिष्टम्	शिष्ट
उत्तम पुरुष	शासानि	शासाव	शासाम

लङ्—भूतकाल

प्रथम पुरुष	अशात्	अशिष्टाम्	अशासुः
मध्यम पुरुष	अशाः (अशात्)	अशिष्टम्	अशिष्ट
उत्तम पुरुष	अशासम्	अशिष्व	अशिष्म

विधिलिङ् लकार

प्रथम पुरुष	शिष्यात्	शिष्याताम्	शिष्युः
मध्यम पुरुष	शिष्याः	शिष्यातम्	शिष्यात
उत्तम पुरुष	शिष्याम्	शिष्याव	शिष्याम

कृदन्तान्त रूप-रचना—

शास्+क्त=शिष्टः (शिष्टा, शिष्टम्) प्रेरणार्थक—शासयति-ते

शास्+क्तवत्=शिष्टवान् (-वती,-वत्) कर्मवाच्य—शिष्यते

शास्+क्त्वा=शिष्ट्वा, शासित्वा सन्नन्त—शिशासिषति

शास्+तुम्=शासितुम्

शास्+तव्य=शासितव्यः (शासितव्या, शासितव्यम्)

शास्+अनीय=शासनीयः (शासनीया, शासनीयम्)

शास्+शतृ=शासत्

दुह्=दूध दुहना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	दोग्धि	दुग्धः	दुहन्ति
मध्यम पुरुष	धोक्षि	दुग्धः	दुग्ध
उत्तम पुरुष	दोह्मि	दुह्वः	दुह्मः

लृट् लकार—भविष्यत्काल

प्रथम पुरुष	धोक्ष्यति	धोक्ष्यतः	धोक्ष्यन्ति
मध्यम पुरुष	धोक्ष्यसि	धोक्ष्यथः	धोक्ष्यथ
उत्तम पुरुष	धोक्ष्यामि	धोक्ष्यावः	धोक्ष्यामः

लोट् लकार—आज्ञार्थक

प्रथम पुरुष	दोग्धु	दुग्धाम्	दुहन्तु
मध्यम पुरुष	दुग्धि	दुग्धम्	दुग्ध
उत्तम पुरुष	दोहानि	दोहाव	दोहाम

लङ् लकार—भूतकाल

प्रथम पुरुष	अधोक्-ग्	अदुग्धाम्	अदुहन्
मध्यम पुरुष	अधोग्	अदुग्धम्	अदुग्ध
उत्तम पुरुष	अदोहम्	अदुह्व	अदुह्म

विधिलिङ् लकार

प्रथम पुरुष	दुह्यात्	दुह्याताम्	दुह्युः
मध्यम पुरुष	दुह्याः	दुह्यातम्	दुह्यात
उत्तम पुरुष	दुह्याम्	दुह्याव	दुह्याम

कृदन्तान्त रूप रचना

दुह् + क्त = दुग्धः (दुग्धा दुग्धम्) प्रेरणार्थक—दोहयति—ते
दुह् + क्तवत् = दुग्धवान् (-वती, -वत्) कर्मवाच्य—दुह्यते
दुह् + क्त्वा = दुग्ध्वा सन्नन्त—दुदुहिषति
दुह् + तुम् = दोग्धुम्
दुह् + तव्य = दोग्धव्यः (दोग्धव्या, दोग्धव्यम्)
दुह् + अनीयः = दोहनीयः (दोहनीया, दोहनीयम्)
दुह् + शतृ = दुहन्, दुहानः (दुहाना, दुहत्)

या = जाना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	याति	यातः	यान्ति
मध्यम पुरुष	यासि	याथः	याथ
उत्तम पुरुष	यामि	यावः	यामः

लृट्—भविष्यत्काल

प्रथम पुरुष	यास्यति	यास्यतः	यास्यन्ति
मध्यम पुरुष	यास्यसि	यास्यथः	यास्यथ
उत्तम पुरुष	यास्यामि	यास्यावः	यास्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	यातु	याताम्	यान्तु
मध्यम पुरुष	याहि	यातम्	यात
उत्तम पुरुष	यानि	याव	याम

लङ्—भूतकाल

प्रथम पुरुष	अयात्	अयाताम्	अयुः
मध्यम पुरुष	अयाः	अयातम्	अयात
उत्तम पुरुष	अयाम्	अयाव	अयाम

विधिलिङ्

प्रथम पुरुष	यायात्	यायाताम्	यायुः
मध्यम पुरुष	यायाः	यायातम्	यायात
उत्तम पुरुष	यायाम्	यायाव	यायाम

कृदन्तान्त—यातः, यातवान्, यात्वा, यातुम्, यातव्यः, यात्, यानीयः।

प्रेरणार्थक—यातयति—ते

सन्नन्त—यियासति।

कर्मवाच्य—यास्यते।

सोपसर्ग प्रयोग—निर् + या—निर्याति = निकलता है। आ + या—आयाति =

आता है। प्र+या—प्रयाति=प्रस्थान करता है। अप+या—अपयाति=दूर होता है। अनु+या—अनुयाति=पीछे जाता है।

२. स्ना (स्नान करना)—स्नाति, स्नास्यति, स्नातु, अस्नात्, स्नायात्।

कृदन्तान्त रूप-रचना—

स्ना+क्त=स्नातः (स्नाता, स्नातम्) प्रेरणार्थक—स्नापयति—ते

स्ना+क्तवत्=स्नातवान् (वती, वत्) सन्नन्त—सिस्नासति

स्ना+क्त्वा=स्नात्वा

स्ना+तुम्=स्नातुम्

स्ना+तव्य=स्नातव्यः (स्नातव्या, स्नातव्यम्)

स्ना+अनीय=स्नानीयः (स्नानीया, स्नानीयम्)

स्ना+शतृ+स्नात्

३. पा (रक्षा करना)—पाति, पास्यति, पातु, अपात्, पायात्।

कृदन्तान्त रूप-रचना—

पा+क्त=पातः प्रेरणार्थक—पाययति—ते

पा+क्तवत्=पातवान् कर्मवाच्य—पायते

पा+क्त्वा=पात्वा

पा+तुम्=पातुम्

पा+तव्य=पातव्यः (पातव्या, पातव्यम्)

पा+अनीय=पानीयः (पानीया, पानीयम्)

पा+शतृ=पात्

अदादिगण की आत्मनेपदी धातु

अधि+इ=पढ़ना, अध्ययन करना

वक्तव्य—पढ़ने अर्थ वाली इ(ङ्) धातु 'अधि' उपसर्ग युक्त ही प्रयुक्त होती है, अतः यहां उपसर्ग युक्त ही रूप दिये जाते हैं।

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अधीते	अधीयाते	अधीयते
मध्यम पुरुष	अधीषे	अधीयाथे	अधीध्वे
उत्तम पुरुष	अधीये	अधीवहे	अधीमहे

लृट्—भविष्यत्काल

प्रथम पुरुष	अध्येष्यते	अध्येष्येते	अध्येष्यन्ते
मध्यम पुरुष	अध्येष्यसे	अध्येष्येथे	अध्येष्यध्वे
उत्तम पुरुष	अध्येष्ये	अध्येष्यावहे	अध्येष्यावहे

लोट्—आज्ञार्थक

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अधीताम्	अधीयाताम्	अधीयताम्
मध्यम पुरुष	अधीष्व	अधीयाथाम्	अधीध्वम्
उत्तम पुरुष	अध्ययै	अध्ययावहै	अध्ययामहै

लङ्—भूतकाल

प्रथम पुरुष	अध्यैत	अध्यैयाताम्	अधीयैयत
मध्यम पुरुष	अध्यैथाः	अध्यैयाथाम्	अध्यैध्वम्
उत्तम पुरुष	अध्यैयि	अध्यैवहि	अध्यैमहि

विधिलिङ् लकार

प्रथम पुरुष	अधीयीत	अधीयाताम्	अधीयीरन्
मध्यम पुरुष	अधीयीथाः	अधीयाथाम्	अधीयीध्वम्
उत्तम पुरुष	अधीयीय	अधीयीवहि	अधीयीमहि

कृदन्तान्त रूप रचना—

अधि+इ+क्त=अधीतः (अधीता, अधीतम्)

अधि+इ+क्तवत्=अधीतवान् (वती, -वत्)

अधि+क्त्वा=अधीत्य

अधि+तुम्=अध्येतुम्

अधि+तव्य=अध्येतव्यः (-तव्या,-तव्यम्)

अधि+अनीय=अध्ययनीयः (अध्ययनीया, अध्ययनीयम्)

अधि+शानच्=अधीयानः (अधीयाना)

प्रेरणार्थक—अध्यापति

कर्मवाच्य—अधीयते

सन्नन्त—अधिजिगांसते

आस्=बैठना

लट्—वर्तमानकाल

प्रथम पुरुष	आस्ते	आसाते	आसते
मध्यम पुरुष	आस्से	आसाथे	आध्वे
उत्तम पुरुष	आसे	आस्वहे	आस्महे

लृट्—भविष्यत्काल

प्रथम पुरुष	आसिष्यते	आसिष्येते	आसिष्यन्ते
मध्यम पुरुष	आसिष्यसे	आसिष्येथे	आसिष्यध्वे
उत्तम पुरुष	आसिष्ये	आसिष्यावहे	आसिष्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	आस्ताम्	आसाताम्	आसताम्
मध्यम पुरुष	आस्स्व	आसाथाम्	आध्वम्
उत्तम पुरुष	आसै	आसावहै	आसामहै

लङ् —भूतकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	आस्त	आसाताम्	आसत
मध्यम पुरुष	आस्थाः	आसाथाम्	आध्वम्
उत्तम पुरुष	आसि	आस्वहि	आस्महि

विधिलिङ् लकार

प्रथम पुरुष	आसीत	आसीयाताम्	आसीरन्
मध्यम पुरुष	आसीथाः	आसीयाथाम्	असीध्वम्
उत्तम पुरुष	आसीय	आसीवहि	आसीमहि

कृदन्तान्त रूप रचना

आस् + क्त = आसितः (-ता, -तम्)
आस् + क्तवत् = आसितवान् (-वती)
आस् + क्त्वा = आसित्वा
आस् + तुम् = आसितुम्
आस् + तव्य = आसितव्यः (—व्या)
आस् + अनीय = आसनीयः (आसनीया, आसनीयम्)
आस् + शानच् = आसीनः (—ना, नम्)

प्रेरणार्थक—आसयति—ते
कर्मवाच्य—आस्यते
सन्नन्त—आसिसिषते
सोपसर्ग प्रयोग—
अन्वास्ते = किसी के बैठने पर बाद में बैठता है।
अध्यास्ते = औरों को दबाकर बैठता है।
उदास्ते = शिथिल होता है।
उपास्ते = उपासना करता है।

शी = सोना, नींद लेना (या लेटना)

लट् — वर्तमानकाल

प्रथम पुरुष	शेते	शयाते	शेरते
मध्यम पुरुष	शेषे	शयाथे	शेध्वे
उत्तम पुरुष	शये	शेवहे	शेमहे

लृट्—भविष्यत्काल

प्रथम पुरुष	शयिष्यते	शयिष्येते	शयिष्यन्ते
मध्यम पुरुष	शयिष्यसे	शयिष्येथे	शयिष्यध्वे
उत्तम पुरुष	शयिष्ये	शयिष्यावहे	शशिष्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	शेताम्	शयाताम्	शेरताम्
मध्यम पुरुष	शेष्व	शयाथाम्	शेध्वम्
उत्तम पुरुष	शयै	शयावहै	शयामहै

लङ्—भूतकाल

प्रथम पुरुष	अशेत	अशयाताम्	अशेरत
मध्यम पुरुष	अशेथाः	अशयाथाम्	अशेध्वम्
उत्तम पुरुष	अशयि	अशेवहि	अशेमहि

विधिलिङ् लकार

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	शयीत	शयीयाताम्	शयीरन्
मध्यम पुरुष	शयीथाः	शयीयाथाम्	शयीध्वम्
उत्तम पुरुष	शयीय	शयीवहि	शयीमहि

कृदन्तान्त रूप रचना

शी + क्त = शयितः (-ता,-तम्) — प्रेरणार्थक—शाययति—ते

शी + क्तवतु = शयितवान् (-वती,-वत्) — कर्मवाच्य—शय्यते

शी + क्त्वा = शयित्वा — सन्नन्त = शिशयिषते

शी + तुम् = शयितुम् — सोपसर्ग प्रयोग—

शी + तव्य = शयितव्यः (—व्या,-व्यम्) — संशेते = संशय करता है।

शी + अनीय = शयनीयः (-या,-यम्) — अनुशेते = पश्चात्ताप करता है।

शी + शानच् = शयानः (-ना,-नम्)

अदादिगण की उभयपदी धातु

ब्रू (वच्) = बोलना

परस्मैपद

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	ब्रवीति (आह)	ब्रूतः (आहतुः)	ब्रुवन्ति (आहुः)
मध्यम पुरुष	ब्रवीषि (आत्थ)	ब्रूथः (आहथुः)	ब्रूथ
उत्तम पुरुष	ब्रवीमि	ब्रूवः	ब्रूमः

ब्रू धातु के लट् के पाँच वचनों में 'आह, आहतुः' आदि रूप भी बनते हैं।

लृट्—भविष्यत्काल

प्रथम पुरुष	वक्ष्यति	वक्ष्यतः	वक्ष्यन्ति
मध्यम पुरुष	वक्ष्यसि	वक्ष्यथः	वक्ष्यथ
उत्तम पुरुष	वक्ष्यामि	वक्ष्यावः	वक्ष्यामः

ज्ञातव्य—ब्रू धातु को लृट् लकार में तथा कृदन्तान्त प्रत्ययों में 'वच्' आदेश हो जाता है।

लोट्—आज्ञार्थक

प्रथम पुरुष	ब्रवीतु	ब्रूताम्	ब्रुवन्तु
मध्यम पुरुष	ब्रूहि	ब्रूतम्	ब्रूत
उत्तम पुरुष	ब्रवाणि	ब्रवाव	ब्रवाम

लङ्—भूतकाल

प्रथम पुरुष	अब्रवीत्	अब्रूताम्	अब्रुवन्
मध्यम पुरुष	अब्रवीः	अब्रूतम्	अब्रूत
उत्तम पुरुष	अब्रवम्	अब्रूव	अब्रूम

विधिलिङ्

प्रथम पुरुष	ब्रूयात्	ब्रूयाताम्	ब्रूयुः
मध्यम पुरुष	ब्रूयाः	ब्रूयातम्	ब्रूयात
उत्तम पुरुष	ब्रूयाम्	ब्रूयाव	ब्रूयाम

आत्मनेपद

लट्—वर्तमानकाल

प्रथम पुरुष	ब्रूते	ब्रुवाते	ब्रुवते
मध्यम पुरुष	ब्रूषे	ब्रुवाथे	ब्रूध्वे
उत्तम पुरुष	ब्रुवे	ब्रूवहे	ब्रूमहे

लृट्—भविष्यत्काल

प्रथम पुरुष	वक्ष्यते	वक्ष्येते	वक्ष्यन्ते
मध्यम पुरुष	वक्ष्यसे	वक्ष्येथे	वक्ष्यध्वे
उत्तम पुरुष	वक्ष्ये	वक्ष्यावहे	वक्ष्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	ब्रूताम्	ब्रुवाताम्	ब्रुवताम्
मध्यम पुरुष	ब्रूष्व	ब्रुवाथाम्	ब्रूध्वम्
उत्तम पुरुष	ब्रुवै	ब्रुवावहै	ब्रुवामहै

लङ्—भूतकाल

प्रथम पुरुष	अब्रूत	अब्रुवाताम्	अब्रुवत
मध्यम पुरुष	अब्रूथाः	अब्रुवाथाम्	अब्रूध्वम्
उत्तम पुरुष	अब्रुवि	अब्रूवहि	अब्रूमहि

विधिलिङ् लकार

प्रथम पुरुष	ब्रुवीत	ब्रुवीयाताम्	ब्रुवीरन्
मध्यम पुरुष	ब्रुवीथाः	ब्रुवीयाथाम्	ब्रुवीध्वम्
उत्तम पुरुष	ब्रुवीय	ब्रुवीवहि	ब्रुवीमहि

कृदन्तान्त रूप रचना—

ब्रू+क्त=उक्तः (उक्ता, उक्तम्)

ब्रू+क्तवत्+उक्तवान् (उक्तवती, उक्तवत्)

ब्रू+क्त्वा=उक्त्वा

ब्रू+तुम्=वक्तुम्

ब्रू+तव्य=वक्तव्यः (वक्तव्या, वक्तव्यम्)

प्रेरणार्थक=वाचयति-ते

कर्मवाच्य=उच्यते

सन्नन्त=विवक्षति

ब्रू+अनीय=वचनीयः (वचनीया, वचनीयम्)
ब्रू+शानच्=ब्रुवाणः (ब्रुवाणा, ब्रुवाणम्)

स्तु=स्तुति करना

वक्तव्य—भविष्यत्काल को छोड़कर अन्य चारों लकारों में स्तु धातु से 'ई' का आगम विकल्प से होता है। ई आने पर 'स्तु' के उ को ओ और फिर ओ को अव् आदेश हो जाता है। अन्य जो विभिन्नताएँ हैं उन्हें रूपों में ही देखिए और स्मरण कीजिए। यह धातु उभयपदी है किन्तु हम यहाँ विद्यार्थियों की सुगमता के लिए केवल परस्मैपद के ही रूप दे रहे हैं।

(परस्मैपद)

लट्—वर्तमानकाल 'ई' आगम के अभाव में

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	स्तौति	स्तुतः	स्तुवन्ति
मध्यम पुरुष	स्तौषि	स्तुथः	स्तुथ
उत्तम पुरुष	स्तौमि	स्तुवः	स्तुमः

लट्—'ई' आगम होने पर

प्रथम पुरुष	स्तवीति	स्तुवीतः	स्तुवन्ति
मध्यम पुरुष	स्तवीषि	स्तुवीथः	स्तुवीथ
उत्तम पुरुष	स्तवीमि	स्तुवीवः	स्तुवीम

लृट्—भविष्यत्काल

प्रथम पुरुष	स्तोष्यति	स्तोष्यतः	स्तोष्यन्ति
मध्यम पुरुष	स्तोष्यसि	स्तोष्यथः	स्तोष्यथ
उत्तम पुरुष	स्तोष्यामि	स्तोष्यावः	स्तोष्यामः

लोट्—आज्ञार्थक, 'ई' आगम के अभाव में

प्रथम पुरुष	स्तौतु	स्तुताम्	स्तुवन्तु
मध्यम पुरुष	स्तुहि	स्तुतम्	स्तुत
उत्तम पुरुष	स्तवानि	स्तवाव	स्तवाम

लोट्—'ई' आगम होने पर

प्रथम पुरुष	स्तवीतु	स्तुवीताम्	स्तुवन्तु
मध्यम पुरुष	स्तुवीहि	स्तुवीतम्	स्तुवीत
उत्तम पुरुष	स्तवानि	स्तवाव	स्तवाम

लङ्—भूतकाल, 'ई' आगम के अभाव में

प्रथम पुरुष	अस्तौत्	अस्तुताम्	अस्तुवन्
मध्यम पुरुष	अस्तौः	अस्तुतम्	अस्तुत
उत्तम पुरुष	अस्तवम्	अस्तुव	अस्तुम

लङ्—'ई' आगम होने पर

प्रथम पुरुष	अस्तवीत्	अस्तुवीताम्	अस्तवन्
मध्यम पुरुष	अस्तवीः	अस्तुवीतम्	अस्तुवीत
उत्तम पुरुष	अस्तवम्	अस्तुवीव	अस्तुवीम

विधिलिङ् लकार, 'ई' आगम के अभाव में

प्रथम पुरुष	स्तुयात्	स्तुयाताम्	स्तुयुः
मध्यम पुरुष	स्तुयाः	स्तुयातम्	स्तुयात
उत्तम पुरुष	स्तुयाम्	स्तुयाव	स्तुयाम

विधिलिङ् 'ई' आगम होने पर

प्रथम पुरुष	स्तुवीयात्	स्तुवीयाताम्	स्तुवीयुः
मध्यम पुरुष	स्तुवीयाः	स्तुवीयातम्	स्तुवीयात
उत्तम पुरुष	स्तुवीयाम्	स्तुवीयाव	स्तुवीयाम

कृदतान्त रूप-रचना

स्तु + क्त = स्तुतः (स्तुता, स्तुतम्)
स्तु + क्तवत् = स्तुतवान् (-वती,-वत्)
स्तु + क्त्वा = स्तुत्वा, प्रस्तुत्य, संस्तुत्य
स्तु + तुम् = स्तोतुम्
स्तु + तव्य = स्तोतव्यः (स्तोतव्या,-व्यम्)
स्तु + अनीय = स्तवनीयः (-नीया,-नीयम्)
स्तु + शत् = स्तुवन् (-वती,-वतम्)
स्तु + आन = स्तुवानः (-ना,-नम्)

प्रेरणार्थक—स्तावयति—ते
कर्मवाच्य—स्तूयते
सन्नन्त—तुष्टूषति
सोपसर्ग प्रयोग —
प्र + स्तु = प्रस्तौति = पेश करता है या प्रस्तुत करता है।

अप + स्तु = अपस्तौति = निन्दा करता है।

उदाहरण :—

१. यदि तुम संतुष्ट हो तो हम भी प्रसन्न हैं।	यदि यूयं तुष्टाः स्थः तर्हि वयमपि प्रसन्नाः स्मः।
२. वे शरीफ बन जाएँ और आज्ञाकारी हों।	ते सज्जनाः सन्तु आज्ञाकारिणश्च भवन्तु।
३. शायद वह आए।	संभवतः स आगच्छेत्।
४. संभव है तू पास हो जाए।	सम्भवतः त्वं उत्तीर्णः स्याः।
५. हम धन-सम्पत्तियों के स्वामी हों।	वयं स्याम पतयो रयीणाम्।
६. हम दोनों मेधाकर पण्डित के विद्यार्थी थे।	आवां मेधाकरपण्डितस्य विद्यार्थिनौ आस्व।
७. तुम हमारे घर रोटी खाओ।	यूयम् अस्माकं गृहे भोजनम् अत्त।
८. सैनिक पंक्तियों में कूच करते हैं।	सैनिकाः पंक्तिषु प्रयान्ति।

९. शिष्य गुरु के पीछे जाता है।	शिष्यः गुरुमनुयाति।
१०. नटी जाना चाहती है।	नटी गन्तुमिच्छति (जिगमिषति)
११. जवाहरलाल ने बुद्धि के बल पर शासन किया।	जवाहरलालः बुद्धिबलेन अशात्।
१२. वेदों को पढ़ कर सुख पाओ।	वेदान् अधीत्य सुखं लभध्वम्।
१३. पराक्रमी ही शत्रुओं को मारते हैं।	पराक्रमिणः एव शत्रून् घ्नन्ति।
१४. पक्षियों के बच्चों को न मार, न मार।	खगशावकान् मा जहि, मा जहि।

अभ्यास

(१) संस्कृत में अनुवाद कीजिए—

(१) जब मनुष्य बुढ़ापे को प्राप्त होता है तो मन के ताप को पाता है। (२) शासक न्यायपूर्वक शासन करें। (३) जालिम (अन्यायी) चटाई पर बैठा है। (४) बैठ, तू कुछ नहीं जानता। (५) वह इस नीति-शास्त्र को नित्य पढ़ता और सुनता है। (६) जो श्रद्धा से पढ़ेगा उसे गुरुजी पढ़ाएँगे। (७) हाथी मच्छर के पैर की विपादिका में सोता है। (८) यह सुनकर सीता दुःखभरी साँस लेती है। (९) शिवजी संकट से रक्षा करें। (१०) सीता लक्ष्मण को सान्त्वना देती है। (११) विश्वास करो, तुम को धन दूँगा।

(२) निम्नलिखित के लिए संस्कृत का एक क्रियापद लिखिए—
हम सब जाएँगे। उन दोनों ने मारा। तुम दोनों सो जाओ। (वे सब) बैठते हैं। (तुम दो) सोओगे। (राजा लोग) शासन करते हैं। साँस लेता हूँ। (हम सब) खाते हैं। (तुम सब) स्तुति करोगे। (वे सब) पढ़ते थे। तू रोया था। (तू) जायेगा और मारेगा। बोलूंगा। वह जाता है और स्तुति करता है। हम सब साँस लेते हैं।

(३) अर्थ बताकर यहाँ लिखित वचन से भिन्न दोनों वचनों में रूप लिखिये—
दुहन्ति, वेद्मि, आस्ताम्, अधीते, शास्ति, आसते, अशयि, रोदिष्यति, आदत्, इत, शये, स्वपिमः, अहन्, श्वसिष्यति, जागरिष्यामि, स्तुतः, धोक्षि, स्वप्यात्, स्वप्स्याम, अस्वपीत्, शाधि, स्वपिहि, रोदितु, ब्रवीतु, स्वपानि, अधोक्, शयीत, शेताम्, अधीयीत, अधीताम्, आसिष्ये।

(४) शुद्ध कीजिए—
सोन्नम् अदति। अत्र बालकौ आसताम्। पद्मानि भाति सरसि। स व्याघ्रम् अहनत्। बलिकाः शय्यासु शयाते। अहं वेत्ति। पुत्राः ब्रूते।

(५) अस् धातु के वर्तमानकाल और भूतकाल में पूरे रूप लिखिए।

चतुर्थ अध्याय

जुहोत्यादिगण

(धातु को द्वित्व)

सामान्य नियम—

(क) जुहोत्यादिगण में कोई विकरण नहीं होता।

(ख) केवल धातु को द्वित्व कर दिया जाता है।

(ग) धातु को द्वित्व करने के बाद जो-जो परिवर्तन होते हैं, वे रूपों में दिये गये हैं।

हु=हवन करना

(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	जुहोति	जुहुतः	जुह्वति
मध्यम पुरुष	जुहोषि	जुहुथः	जुहुथ
उत्तम पुरुष	जुहोमि	जुहुवः	जुहुमः

लृट्—भविष्यत्काल

प्रथम पुरुष	होष्यति	होष्यतः	होष्यन्ति
मध्यम पुरुष	होष्यसि	होष्यथः	होष्यथ
उत्तम पुरुष	होष्यामि	होष्यावः	होष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	जुहोतु	जुहुताम्	जुह्वतु
मध्यम पुरुष	जुहुधि	जुहुतम्	जुहुत
उत्तम पुरुष	जुहवानि	जुहवाव	जुहवाम

लङ्—भूतकाल

प्रथम पुरुष	अजुहोत्	अजुहुताम्	अजुहवुः
मध्यम पुरुष	अजुहोः	अजुहुतम्	अजुहुत
उत्तम पुरुष	अजुहवम्	अजुहुव	अजुहुम

विधिलिङ् लकार

प्रथम पुरुष	जुहुयात्	जुहुयाताम्	जुहुयुः
मध्यम पुरुष	जुहुयाः	जुहुयातम्	जुहुयात
उत्तम पुरुष	जुहुयाम्	जुहुयाव	जुहुयाम

कृदन्तान्त रूप-रचना—

हु + क्त = हुत: (पुं०), हुता (स्त्री०), हुतम् (नपुं०)
हु + क्तवत् = (पुं०), हुतवती (स्त्री०)
हु + क्त्वा = हुत्वा
हु + तुम् = होतुम्
हु + तव्य = होतव्य: (पुं०), होतव्या (स्त्री०), होतव्यम् (नपुं०)
हु + अनीय — हवनीया (पुं०), हवनीया (स्त्री०) हवनीयम् (नपुं०)
हु + शतृ = जुह्वत् (पुं०, नपुं०), जुह्वती (स्त्री०)

प्रेरणार्थक—हावयति, ते।
भाववाच्य—हूयते।
सन्नन्त—जुहूषति

भृञ् = धारण करना, भरना, पालन-पोषण करना

(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	बिभर्ति	बिभृत:	बिभ्रति
मध्यम पुरुष	बिभर्षि	बिभृथ:	बिभृथ
उत्तम पुरुष	बिभर्षि	बिभृव:	बिभृम:

लृट्—भविष्यत्काल

प्रथम पुरुष	भरिष्यति	भरिष्यत:	भरिष्यन्ति
मध्यम पुरुष	भरिष्यसि	भरिष्यथ:	भरिष्यथ
उत्तम पुरुष	भरिष्यामि	भरिष्याव:	भरिष्याम:

लोट्—आज्ञार्थक

प्रथम पुरुष	बिभर्तु	बिभृताम्	बिभ्रतु
मध्यम पुरुष	बिभृहि	बिभृतम्	बिभृत
उत्तम पुरुष	बिभराणि	बिभराव	बिभराम

लङ्—भूतकाल

प्रथम पुरुष	अबिभ:	अबिभृताम्	अबिभरु:
मध्यम पुरुष	अबिभ:	अबिभृतम्	अबिभृत
उत्तम पुरुष	अबिभरम्	अबिभृव	अबिभृम

विधिलिङ् लकार

प्रथम पुरुष	बिभृयात्	बिभृयाताम्	बिभृयु:
मध्यम पुरुष	बिभृया:	बिभृयातम्	बिभृयात
उत्तम पुरुष	बिभृयाम्	बिभृयाव	बिभृयाम

कृदन्तान्त रूप-रचना—

भृ + क्त + भृत: (पुं०), भृता (स्त्री०), भृतम् (नपुं०)
भृ + क्तवत् = भृतवान् (पुं०), भृतवती (स्त्री०)

प्रेरणार्थक—भारयति—ते
कर्मवाच्य—भ्रियते।

भृ+क्त्वा=भृत्वा सन्नन्त—बुभूर्षति
भृ+तुम्=भर्तुम्
भृ+तव्य=भर्तव्यः (भर्तव्या, भर्तव्यम्)
भृ+अनीय=भरणीयः (पुं०)
भृ+शतृ=बिभ्रत्
भृ+शानच्=बिभ्राणः (पुं०)

दा=देना, (उभयपदी)

(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	ददाति	दत्तः	ददति
मध्यम पुरुष	ददासि	दत्थः	दत्थ
उत्तम पुरुष	ददामि	दद्वः	दद्मः

लृट्—भविष्यत्काल

प्रथम पुरुष	दास्यति	दास्यतः	दास्यन्ति
मध्यम पुरुष	दास्यसि	दास्यथः	दास्यथ
उत्तम पुरुष	दास्यामि	दास्यावः	दास्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	ददातु	दत्ताम्	ददतु
मध्यम पुरुष	देहि	दत्तम्	दत्त
उत्तम पुरुष	ददानि	ददाव	ददाम

लङ्—भूतकाल

प्रथम पुरुष	अददात्	अदत्ताम्	अददुः
मध्यम पुरुष	अददाः	अदत्तम्	अदत्त
उत्तम पुरुष	अददाम्	अदद्व	अदद्म

विधिलिङ् लकार

प्रथम पुरुष	दद्यात्	दद्याताम्	दद्युः
मध्यम पुरुष	दद्याः	दद्यातम्	दद्यात
उत्तम पुरुष	दद्याम्	दद्याव	दद्याम

(आत्मनेपद)

लट्—वर्तमानकाल

प्रथम पुरुष	दत्ते	ददाते	ददते
मध्यम पुरुष	दत्से	ददाथे	दद्ध्वे
उत्तम पुरुष	ददे	दद्वहे	दद्महे

लृट्—भविष्यत्काल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	दास्यते	दास्येते	दास्यन्ते
मध्यम पुरुष	दास्यसे	दास्येथे	दास्यध्वे
उत्तम पुरुष	दास्ये	दास्यावहे	दास्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	दत्ताम्	ददाताम्	ददताम्
मध्यम पुरुष	दत्स्व	ददाथाम्	दद्ध्वम्
उत्तम पुरुष	ददै	ददावहै	ददामहै

लङ्—भूतकाल

प्रथम पुरुष	अदत्त	अददाताम्	अददत
मध्यम पुरुष	अदत्थाः	अददाथाम्	अदद्ध्वम्
उत्तम पुरुष	अददि	अदद्वहि	अदद्महि

विधिलिङ् लकार

प्रथम पुरुष	ददीत	ददीयाताम्	ददीरन्
मध्यम पुरुष	ददीथाः	ददीयाथाम्	ददीध्वम्
उत्तम पुरुष	ददीय	ददीवहि	ददीमहि

कृदन्तान्त रूप-रचना—

दा+क्त=दत्तः (दत्ता, दत्तम्)
दा+क्तवत्=दत्तवान् (-वती)
दा+क्त्वा=दत्वा, प्रदाय
दा+तुम्=दातुम्
दा+तव्य=दातव्यः (दातव्या, दातव्यम्)
दा+अनीय=दानीयः (दानीया, दानीयम्)
दा+शतृ=ददत्
दा+शानच्=ददानः (ददाना, ददानम्)

प्रेरणार्थक—दापयति-ते
कर्मवाच्य—दीयते
सन्नन्त—दित्सति

धा=धारण करना, (उभयपदी)
(परस्मैपद)

लट्—वर्तमानकाल

प्रथम पुरुष	दधाति	धत्तः	दधति
मध्यम पुरुष	दधासि	धत्थः	धत्थ
उत्तम पुरुष	दधामि	दध्वः	दध्मः

(आत्मनेपद)

प्रथम पुरुष	धत्ते	दधाते	दधते

मध्यम पुरुष	धत्से	दधाथे	धद्ध्वे
उत्तम पुरुष	दधे	दध्वहे	दध्महे

लृट्—भविष्यत्काल

(परस्मैपद)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	धास्यति	धास्यत:	धास्यन्ति
मध्यम पुरुष	धास्यसि	धास्यथ:	धास्यथ
उत्तम पुरुष	धास्यामि	धास्याव:	धास्याम:

(आत्मनेपद)

प्रथम पुरुष	धास्यते	धास्येते	धास्यन्ते
मध्यम पुरुष	धास्यसे	धास्येथे	धास्यध्वे
उत्तम पुरुष	धास्ये	धास्यावहे	धास्यामहे

लोट्—आज्ञार्थक

(परस्मैपद)

प्रथम पुरुष	दधातु	धत्ताम्	दधतु
मध्यम पुरुष	धेहि	धत्तम्	धत्त
उत्तम पुरुष	दधानि	दधाव	दधाम

(आत्मनेपद)

प्रथम पुरुष	धत्ताम्	दधाताम्	दधताम्
मध्यम पुरुष	धत्स्व	दधाथाम्	धद्ध्वम्
उत्तम पुरुष	दधै	दधावहै	दधामहै

लङ्—भूतकाल

(परस्मैपद)

प्रथम पुरुष	अदधात्	अधत्ताम्	अदधु:
मध्यम पुरुष	अदधा:	अधत्तम्	अधत्त
उत्तम पुरुष	अदधाम्	अदध्व	अदध्म

(आत्मनेपद)

प्रथम पुरुष	अधत्त	अदधाताम्	अदधत
मध्यम पुरुष	अधत्था:	अदधाथाम्	अधद्ध्वम्
उत्तम पुरुष	अदधि	अदध्वहि	अदध्महि

विधिलिङ्

(परस्मैपद)

प्रथम पुरुष	दध्यात्	दध्याताम्	दध्यु:
मध्यम पुरुष	दध्या:	दध्यातम्	दध्यात
उत्तम पुरुष	दध्याम्	दध्याव	दध्याम

(आत्मनेपद)

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	दधीत	दधीयाताम्	दधीरन्
मध्यम पुरुष	दधीथाः	दधीयाथाम्	दधीध्वम्
उत्तम पुरुष	दधीय	दधीवहि	दधीमहि

कृदन्तान्त रूप रचना—

धा+क्त=धत्तः (धत्ता, धत्तम्)
धा+क्तवान्=धत्तवान् (-वती, -वत्)
धा+क्त्वा=धत्वा, परिधाय
धा+तुम्=धातुम्
धा+तव्य=धातव्यः (-व्या, -व्यम्)
धा+अनीय=धानीयः
धा+शतृ=दधत् (दधती, दधत्)
धा+शानच्=दधानः (दधाना, दधानम्)

प्रेरणार्थक—धापयति—ते
कर्मवाच्य—धीयते
सन्नन्त—धित्सति
सोपसर्ग प्रयोग—
नि+धा=निदधाति=ध्यान करता है।
वि+धा=विदधाति=करता है।
(सहसा विदधीत न क्रियाम्)
सम्+धा=सन्दधाति=संधान करता है।
परि+धा=परिदधाति=धारण करता है।

भी=डरना

(परस्मैपद)

लट्—वर्तमानकाल

प्रथम पुरुष	बिभेति	बिभीतः	बिभ्यति
मध्यम पुरुष	बिभेषि	बिभीथः	बिभीथ
उत्तम पुरुष	बिभेमि	बिभीवः	बिभीमः

लृट्—भविष्यत्काल

प्रथम पुरुष	भेष्यति	भेष्यतः	भेष्यन्ति
मध्यम पुरुष	भेष्यसि	भेष्यथः	भेष्यथ
उत्तम पुरुष	भेष्यामि	भेष्यावः	भेष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	बिभेतु	बिभीताम्	बिभ्यतु
मध्यम पुरुष	बिभीहि	बिभीतम्	बिभीत
उत्तम पुरुष	बिभयानि	बिभयाव	बिभयाम

१. 'भी' धातु के बहुत से स्थानों पर दो दो रूप बनते हैं किन्तु विद्यार्थियों को कठिनता से दूर रखने के लिए उन दूसरे रूपों को यहाँ नहीं दिया गया।

लङ्—भूतकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	अबिभेत्	अबिभीताम्	अबिभयुः
मध्यम पुरुष	अबिभेः	अबिभीतम्	अबिभीत
उत्तम पुरुष	अबिभयम्	अबिभीव	अबिभीम

विधिलिङ् लकार

प्रथम पुरुष	बिभीयात्	बिभीयाताम्	बिभीयुः
मध्यम पुरुष	बिभीथाः	बिभीयातम्	बिभीयात
उत्तम पुरुष	बिभीयाम्	बिभीयाव	बिभीयाम

कृदन्तान्त रूप-रचना—

भी + क्त = भीतः (भीता, भीतम्) प्रेरणार्थक—भायाति—ते, भीषयते

भी + क्तवत् = भीतवान् (भीतवती) भाववाच्य—भीयते

भी + क्त्वा = भीत्वा सन्नन्त—बिभीषते

भी + तुम् = भेतुम्

भी + तव्य = भेतव्यः (भेतव्या, भेतव्यम्)

भी + अनीय = भयनीयः (भयनीया, भयनीयम्)

भी + शतृ = बिभ्यत्

हा = छोड़ना

(परस्मैपद)

लट्—वर्तमानकाल

प्रथम पुरुष	जहाति	जहीतः	जहति
मध्यम पुरुष	जहासि	जहीथः	जहीथ
उत्तम पुरुष	जहामि	जहीवः	जहीमः

लृट्—भविष्यत्काल

प्रथम पुरुष	हास्यति	हास्यतः	हास्यन्ति
मध्यम पुरुष	हास्यसि	हास्यथः	हास्यथ
उत्तम पुरुष	हास्यामि	हास्यावः	हास्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	जहातु	जहीताम्	जहतु
मध्यम पुरुष	जहाहि, जहीहि	जहीतम्	जहीत
उत्तम पुरुष	जहानि	जहाव	जहाम

लङ्—भूतकाल

प्रथम पुरुष	अजहात्	अजहीताम्	अजहुः
मध्यम पुरुष	अजहाः	अजहीतम्	अजहीत
उत्तम पुरुष	अजहाम्	अजहीव	अजहीम

विधिलिङ् लकार

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	जह्यात्	जह्याताम्	जह्युः
मध्यम पुरुष	जह्याः	जह्यातम्	जह्यात
उत्तम पुरुष	जह्याम्	जह्याव	जह्याम

कृदन्तान्त रूप-रचना—

हा + क्त = हीनः (हीना, हीनम्) **प्रेरणार्थक**—हापयति-ते

हा + क्तवत् = हीनवान् (हीनवती) **कर्मवाच्य**

हा + क्त्वा = हित्वा, विहाय **सन्नन्त**—जिहासति

हा + तुम् = हातुम्

हा + तव्य = हातव्यः (हातव्या, हातव्यम्)

हा + अनीय = हानीयः (हानीया, हानीयम्)

हा + शतृ = जहत्

Todo

उदाहरण—

१. ऋषि देवों का यज्ञ करता है — ऋषिः देवान् जुहोति।

२. राम, सीता तथा लक्ष्मण वन में हवन करते हैं। — सीता रामस्तथा लक्ष्मणः वने जुह्वति।

३. तूने कब यज्ञ किया? — त्वं कदा अजुहोः ?

४. मैं पिछले वर्ष प्रतिदिन हवन करता था। — गतवर्षेऽहं प्रतिदिनम् अजुहवम्।

५. केवल पेट को कौन नहीं भर लेता। — उदरं को न बिभर्ति केवलम्।

६. मैंने बड़े परिश्रम से लड़कों को पाला। — अहमतिश्रमेण पुत्रान् अबिभरम्।

७. शासक उत्तम हों तो प्रजा का न्याय से पालन करें। — यदि शासकाः उत्तमाः स्युर्स्तर्हि न्यायेन प्रजा बिभृयुः।

८. दीपावली के शुभ दिन हम हवन करेंगे। — दीपावल्याः शुभे दिवसे वयं होष्यामः।

९. बालक ताले को देखकर डरता है। — बालः विष्कम्भं वीक्ष्य बिभेति।

अभ्यास

(१) संस्कृत में अनुवाद कीजिए—

ऋषि वन में यज्ञ करते थे, और नहीं डरते थे। तुमने पुत्र को सब कुछ दे दिया, पर वह अब बुढ़ापे में तुम्हारा पालन नहीं करता। तुम उस समय उसके क्रोध से डर गये थे। सुषुप्ति में पुरुष न सुनता है, न देखता है, न सूंघता है, न छूता है, न अभिवादन करता है, न आनन्द पाता है, न कुछ छोड़ता है, न आना-जाना करता है। (वे सब) पालन करें, (तुम दोनों) कपड़े पहनो।

(२) निम्नलिखित धातुओं की निर्दिष्ट लकारों में रूप-रचना कीजिए:—

हु—लट् तथा लङ्, भृ—लट् तथा विधिलिङ्, भी—लोट् तथा लृट्, दा—लट् तथा लोट्, धा—लृट् तथा विधिलिङ्, पा—लृट् तथा लङ्।

(३) दिये गये रूपों के परिचय दीजिए कि वे किस-किस धातु से किस काल (लकार) पुरुष और वचन की क्रियाएँ हैं—

जहाति, जुहोमि, बिभर्ति, ददति, जहीमः, अजहात्, अजुहोत, अबिभः, अबिभेत् अददुः, अदधात्, अजहिम, जहातु, जुहोतु, बिभर्तु, बिभ्यतु, ददतु, धेहि, जहाम।

पंचम अध्याय

दिवादिगण

(य विकरण)

(क) दिवादिगण के धातुओं में श्यन् विकरण लगता है। श् और न् का लोभ हो जाता है, 'य' शेष रह जाता है। 'दिव्' धातु की 'इ' को चार लकारों में दीर्घ 'ई' हो जाता है।

जैसे—दिव्+य+ति=दीव्यति।

दिवादिगण को परस्मैपदी धातु

दिव्=चमकना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	दीव्यति	दीव्यत:	दीव्यन्ति
मध्यम पुरुष	दीव्यसि	दीव्यथ:	दीव्यथ
उत्तम पुरुष	दीव्यामि	दीव्याव:	दीव्याम:

लृट्—भविष्यत्काल

प्रथम पुरुष	देविष्यति	देविष्यत:	देविष्यन्ति
मध्यम पुरुष	देविष्यसि	देविष्यथ:	देविष्यथ
उत्तम पुरुष	देविष्यामि	देविष्याव:	देविष्याम:

लोट्—आज्ञार्थक

प्रथम पुरुष	दीव्यतु	दीव्यताम्	दीव्यन्तु
मध्यम पुरुष	दीव्य	दीव्यतम्	दीव्यत
उत्तम पुरुष	दीव्यानि	दीव्याव	दीव्याम

लङ्—भूतकाल

प्रथम पुरुष	अदीव्यत्	अदीव्यताम्	अदीव्यन्
मध्यम पुरुष	अदीव्य:	अदीव्यतम्	अदीव्यत
उत्तम पुरुष	अदीव्यम्	अदीव्याव	अदीव्याम

विधिलिङ् लकार

प्रथम पुरुष	दीव्येत्	दीव्येताम्	दीव्येयु:

मध्यम पुरुष	दीव्येः	दीव्येतम्	दीव्येत
उत्तम पुरुष	दीव्येयम्	दीव्येव	दीव्येम

कृदन्तान्त रूप-रचना—

दिव्+क्त=द्यूतम्, द्यूनः — प्रेरणार्थक—देवयति—ते

दिव्=क्तवत्=द्यूतवान् (-वती) — कर्मवाच्य—दीव्यते

दिव्+क्त्वा=देवित्वा, द्यूत्वा — सन्नन्त—दिदेविषति

दिव्+तुम्=देवितुम्

दिव्+तव्य=देवितव्यः

दिव्+अनीय=देवनीयः (देवनीया, देवनीयम्)

दिव्+शतृ=दीव्यत् (दीव्यन्, दीव्यन्ती, दीव्यत्)

भ्रम्=घूमना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	भ्राम्यति	भ्राम्यतः	भ्राम्यन्ति
मध्यम पुरुष	भ्राम्यसि	भ्राम्यथः	भ्राम्यथ
उत्तम पुरुष	भ्राम्यामि	भ्राम्यावः	भ्राम्यामः

लृट्—भविष्यत्काल

प्रथम पुरुष	भ्रमिष्यति	भ्रमिष्यतः	भ्रमिष्यन्ति
मध्यम पुरुष	भ्रमिष्यसि	भ्रमिष्यथः	भ्रमिष्यथ
उत्तम पुरुष	भ्रमिष्यामि	भ्रमिष्यावः	भ्रमिष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	भ्राम्यतु	भ्राम्यताम्	भ्राम्यन्तु
मध्यम पुरुष	भ्राम्य	भ्राम्यतम्	भ्राम्यत
उत्तम पुरुष	भ्राम्याणि	भ्राम्याव	भ्राम्याम

लङ्—भूतकाल

प्रथम पुरुष	अभ्राम्यत्	अभ्राम्यताम्	अभ्राम्यन्
मध्यम पुरुष	अभ्राम्यः	अभ्राम्यतम्	अभ्राम्यत
उत्तम पुरुष	अभ्राम्यम्	अभ्राम्याव	अभ्राम्याम

विधिलिङ् लकार

प्रथम पुरुष	भ्राम्येत्	भ्राम्येताम्	भ्राम्येयुः
मध्यम पुरुष	भ्राम्येः	भ्राम्येतम्	भ्राम्येत
उत्तम पुरुष	भ्राम्येयम्	भ्राम्येव	भ्राम्येम

कृदन्तान्त रूप-रचना—

भ्रम्+क्त=भ्रान्तः (भ्रान्ता, भ्रान्तम्) — प्रेरणार्थक—भ्रामयति—ते

भ्रम्+क्तवत्=भ्रान्तवान् (-वती) — भाववाच्य—भ्राम्यते

भ्रम् + क्त्वा = भ्रान्त्वा
भ्रम् + तुम् = भ्रान्तुम्
भ्रम् + तव्य = भ्रमितव्य:
भ्रम् + शतृ = भ्राम्यन् (भ्राम्यन्ती)
भ्रम् + अनीय: = (भ्रमणीया, भ्रमणीयम्)

सन्नन्त—बिभ्रमिषति
सोपसर्ग प्रयोग—
परिभ्राम्यति = चारों ओर घूमता है।

व्यध् = बींधना, शिकार करना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	विध्यति	विध्यत:	विध्यन्ति
मध्यम पुरुष	विध्यसि	विध्यथ:	विध्यथ
उत्तम पुरुष	विध्यामि	विध्याव:	विध्याम:

लृट्—भविष्यत्काल

प्रथम पुरुष	व्यत्स्यति	व्यत्स्यत:	व्यत्स्यन्ति
मध्यम पुरुष	व्यत्स्यसि	व्यत्स्यथ:	व्यत्स्यथ
उत्तम पुरुष	व्यत्स्यामि	व्यत्स्याव:	व्यत्स्याम:

लोट्—आज्ञार्थक

प्रथम पुरुष	विध्यतु	विध्यताम्	विध्यन्तु
मध्यम पुरुष	विध्य	विध्यतम्	विध्यन्त
उत्तम पुरुष	विध्यानि	विध्याव	विध्याम

लङ्—भूतकाल

प्रथम पुरुष	अविध्यत्	अविध्यताम्	अविध्यन्
मध्यम पुरुष	अविध्य:	अविध्यतम्	अविध्यत
उत्तम पुरुष	अविध्यम्	अविध्याव	अविध्याम

विधिलिङ् लकार

प्रथम पुरुष	विध्येत्	विध्येताम्	विध्येयु:
मध्यम पुरुष	विध्ये:	विध्येतम्	विध्येत
उत्तम पुरुष	विध्येयम्	विध्येव	विध्येम

कृदन्तान्त रूप-रचना—

व्यध् + क्त = विद्ध:, विद्धा, विद्धम् — प्रेरणार्थक—वेधयति-ते
व्यध् + क्तवत् = विद्धवान् (-वती) — कर्मवाच्य—विध्यते

१. व्यध् धातु के 'य्' को 'इ' संप्रसारण हो जाता है भविष्यत्काल को छोड़कर। यह संप्रसारण कई कृदन्तान्त रूपों में भी होता है।

व्यध् + क्त्वा = विद्ध्वा — सन्नन्त = विवेधिषति
व्यध् + तुम् = वेद्धुम्

व्यध्+अनीय=वेधनीयः (वेधनीया, वेधनीयम्)
व्यध्+शतृ=विध्यन् (विध्यन्ती)

जन् (जा)=उत्पन्न होना

वक्तव्य—'जन्' धातु को भविष्यत्काल में छोड़कर 'जा' आदेश हो जाता है।

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	जायते	जायेते	जायन्ते
मध्यम पुरुष	जायसे	जायेथे	जायध्वे
उत्तम पुरुष	जाये	जायावहे	जायामहे

लृट् भविष्यत्काल

प्रथम पुरुष	जनिष्यते	जनिष्येते	जनिष्यन्ते
मध्यम पुरुष	जनिष्यसे	जनिष्येथे	जनिष्यध्वे
उत्तम पुरुष	जनिष्ये	जनिष्यावहे	जनिष्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	जायताम्	जायेताम्	जायन्ताम्
मध्यम पुरुष	जायस्व	जायेथाम्	जायध्वम्
उत्तम पुरुष	जायै	जायावहै	जायामहै

लङ्—भूतकाल

प्रथम पुरुष	अजायत	अजायेताम्	अजायन्त
मध्यम पुरुष	अजायथाः	अजायेथाम्	अजायध्वम्
उत्तम पुरुष	अजाये	अजायावहि	अजायामहि

विधिलिङ्

प्रथम पुरुष	जायेत	जायेयाताम्	जायेरन्
मध्यम पुरुष	जायेथाः	जायेयाथाम्	जायेध्वम्
उत्तम पुरुष	जायेय	जायेवहि	जायेमहि

कृदन्तान्त रूप-रचना—

जन्+क्त=जातः (जाता, जातम्)
जन्+क्तवत्=जातवान् (-वती)
जन्+क्त्वा=जनित्वा
जन्+तुम्=जनितुम्
जन्+तव्य=जनितव्यः (-व्या, -व्यम्)
जन्+अनीय=जननीयः (जननीया, जननीयम्)
जन्+शानच्=जायमानः (जायमाना, जायमानम्)

प्रेरणार्थक—जानयति—ते
भाववाच्य—जन्यते
सन्नन्त—जिजनिषति

विद् = होना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	विद्यते	विद्येते	विद्यन्ते
मध्यम पुरुष	विद्यसे	विद्येथे	विद्यध्वे
उत्तम पुरुष	विद्ये	विद्यावहे	विद्यामहे

लृट्—भविष्यत्काल

प्रथम पुरुष	वेत्स्यते	वेत्स्येते	वेत्स्यन्ते
मध्यम पुरुष	वेत्स्यसे	वेत्स्येथे	वेत्स्यध्वे
उत्तम पुरुष	वेत्स्ये	वेत्स्यावहे	वेत्स्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	विद्यताम्	विद्येताम्	विद्यन्ताम्
मध्यम पुरुष	विद्यस्व	विद्येथाम्	विद्यध्वम्
उत्तम पुरुष	विद्यै	विद्यावहै	विद्यामहै

लङ्—भूतकाल

प्रथम पुरुष	अविद्यत	अविद्येताम्	अविद्यन्त
मध्यम पुरुष	अविद्यथाः	अविद्येथाम्	अविद्यध्वम्
उत्तम पुरुष	अविद्ये	अविद्यावहि	अविद्यामहि

विधिलिङ् लकार

प्रथम पुरुष	विद्येत	विद्येयाताम्	विद्येरन्
मध्यम पुरुष	विद्येथाः	विद्येयाथाम्	विद्येध्वम्
उत्तम पुरुष	विद्येय	विद्येवहि	विद्येमहि

कृदन्तान्त रूप-रचना

विद् + क्त = वित्तः (वित्ता, वित्तम्)

विद् + क्तवत् = वित्तवान् (-वती)

विद् + क्त्वा = वित्त्वा

विद् + तुम् = वेत्तुम्

विद् + तव्य = वेत्तव्यः (वेत्तव्या, वेत्तव्यम्)

विद् + अनीय = वेदनीयः (वेदनीया, वेदनीयम्)

विद् + शानच् = विद्यमानः (विद्यमाना, विद्यमानम्)

भाववाच्य—विद्यते, अविद्यत, विद्यताम्, विद्येत, वेत्स्यते

सन्नन्त—विविदिषति

युध् = लड़ना

लट्—वर्तमानकाल

प्रथम पुरुष	युध्यते	युध्येते	युध्यन्ते
मध्यम पुरुष	युध्यसे	युध्येथे	युध्यध्वे
उत्तम पुरुष	युध्ये	युध्यावहे	युध्यामहे

लृट्—भविष्यत्काल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	योत्स्यते	योत्स्येते	योत्स्यन्ते
मध्यम पुरुष	योत्स्यसे	योत्स्येथे	योत्स्यध्वे
उत्तम पुरुष	योत्स्ये	योत्स्यावहे	योत्स्यामहे

लोट्—आज्ञार्थक

प्रथम पुरुष	युध्यताम्	युध्येताम्	युध्यन्ताम्
मध्यम पुरुष	युध्यस्व	युध्येथाम्	युध्यध्वम्
उत्तम पुरुष	युध्यै	युध्यावहै	युध्यामहै

लङ्—भूतकाल

प्रथम पुरुष	अयुध्यत	अयुध्येताम्	अयुध्यन्त
मध्यम पुरुष	अयुध्यथाः	अयुध्येथाम्	अयुध्यध्वम्
उत्तम पुरुष	अयुध्ये	अयुध्यावहि	अयुध्यामहि

विधिलिङ् लकार

प्रथम पुरुष	युध्येत	युध्येयाताम्	युध्येरन्
मध्यम पुरुष	युध्येथाः	युध्येयाथाम्	युध्येध्वम्
उत्तम पुरुष	युध्येय	युध्येवहि	युध्येमहि

कृदन्तान्त रूप-रचना—

युध् + क्त + युद्धम् — प्रेरणार्थक—योधयति—ते

युध् + क्तवत् = युद्धवान् (-वती) — भाववाच्य—युध्यते

युध् + क्त्वा = युद्ध्वा — सन्नन्त—युयुत्सति

युध् + तुम् = योद्धुम्

युध् + तव्य = योद्धव्यः (योद्धव्या, योद्धव्यम्)

युध् + अनीय = योधनीयः

युध् + शानच् = युध्यमानः (योध्यमान)

दिवादिगण की कुछ अन्य उपयोगी परस्मैपदी धातुओं के रूप

शम्—(शान्त होना) शाम्यति, शमिष्यति, शाम्यतु, अशाम्यत्, शाम्येत्। शामयति-ते, शाम्यते, शिशमिषति, शान्त, शमित्वा, शान्त्वा, शमितुम्, शमितव्य, शमनीय, शाम्यत्।

नृत्—(नाचना) नृत्यति, नर्तिष्यति, (नर्त्स्यति आदि भी) नृत्यतु, अनृत्यत्, नृत्येत्। नर्तयति। नृत्यते, निनर्तिषति, नृत्त, नर्तित्वा, नर्तितुम्, नर्तितव्य, नर्तनीय। नृत्यत्।

क्रुध्—(क्रोध करना) क्रुध्यति, क्रोत्स्यति, क्रुध्यतु, अक्रुध्यत् अक्रुध्येत्। क्रोधयति। क्रुध्यते। चुक्रुत्सति। क्रुद्ध। क्रुद्ध्वा। क्रोद्धस्। क्रोद्धव्य, क्रोधनीय। क्रुध्यत्।

नश्—(नष्ट होना) नश्यति, नशिष्यति (नङ्क्ष्यति), नश्यतु, अनश्यत्, नश्येत्।

नाशयति । नश्यते । निनशिषति । नष्ट । नष्ट्वा (नशित्वा) । नशितुम्, नशितव्य (नष्टव्य) । नशनीय । नश्यत् ।

लुभ्—(लोभ करना) लुभ्यति, लोभिष्यति, लुभ्यतु, अलुभ्यत्, लुभ्येत् । लोभयति, लुभ्यते । लुलुप्सति । लुब्ध । लोब्धुम् । लोब्धव्य । लोभनीय । लुभ्यत् ।

मुह्—(बेहोश होना) मुह्यति, मोहिष्यति, मुह्यतु, अमुह्यत् मुह्येत् ।

शुध्—(शुद्ध होना) शुध्यति, शोत्स्यति शुद्ध्यतु, अशुध्यत्, शुध्येत् ।

त्रस्—(डसना) त्रस्यति, त्रसिष्यति, त्रस्यतु, अत्रस्यत्, त्रस्येत् ।

पुष्—(पुष्ट होना) पुष्यति, पोक्ष्यति, पुष्यतु, अपुष्यत्, पुष्येत् ।

कुप्—(क्रोध करना) कुप्यति, कोपिष्यति, कुप्यतु, अकुप्यत्, कुप्येत् ।

शुष्—(सूखना) शुष्यति, शोक्ष्यति, शुष्यतु अशुष्यत्, शुष्येत् ।

तुष्—(प्रसन्न होना) तुष्यति, तोक्ष्यति, तुष्यतु, अतुष्यत्, तुष्येत् ।

सिव्—(सीना) सीव्यति, सेविष्यति, सीव्यतु, असीव्यत्, सीव्येत् ।

सिध्—(सिद्ध होना) सिध्यति, सेत्स्यति, सिध्यतु, असिध्यत्, सिध्येत् ।

(आत्मनेपदी)

मन्—(मानना) मन्यते, मंस्यते, मन्यताम्, अमन्यत, मन्येत ।

खिद्—(दुःखी होना) खिद्यते, खेत्स्यते, खिद्यताम्, अखिद्यत, खिद्येत ।

(उभयपदी)

क्लिश्—(दुःख सहना) क्लिश्यति—ते, क्लेशिष्यति—ते, क्लिश्यतु—ताम् । अक्लिश्यत्—त, क्लिश्येत्—त ।

उदाहरण—

१. सूर्य के प्रकाश से रत्न चमकते हैं ।	सूर्यस्य प्रकाशेन रत्नानि दीव्यन्ति ।
२. पूर्णिमा में पूरा चाँद आकाश में चमकता है ।	पूर्णिमायां पूर्णः चन्द्रः आकाशे दीव्यति ।
३. जब रात होगी तब तारे आकाश में चमकेंगे ।	यदा रात्रिर्भविष्यति तदा ताराः आकाशे देविष्यन्ति ।
४. परोपकारी पुरुष का मुंह तेज से चमकता है ।	परोपकारिणः पुरुषस्य मुखं तेजसा दीव्यति ।
५. सीपी चाँदी की तरह चमकती है, मूढ़ पुरुष उसमें लुभाता है ।	शुक्ता रजतवत् दीव्यति, मूढ़ः पुरुषः तस्यां लुभ्यति ।
६. मैं कक्षा में चमकूँ, यह मेरी सबसे तीव्र इच्छा है ।	अहं कक्षायां दीव्येयम् एषा एव मम तीव्रतमा इच्छा अस्ति ।
७. हम (दोनों) खेलों में चमकें तो हमारे स्कूल का यश हो ।	यदि आवां क्रीडासु दीव्येव तर्हि अस्माकं विद्यालयस्य यशः भवेत् ।
८. दुर्जन और शत्रुजन नष्ट हों, सज्जनों का यश चमके ।	दुर्जनाः शत्रुजनाश्च नश्यन्तु, सज्जनानाम् च यशः दीव्यतु ।

९. यदि युद्ध में सारी सेना नष्ट हो जाएगी तो क्या करोगे ?	यदि युद्धे सर्वाऽपि सेना नंक्ष्यति तर्हि किं करिष्यथ ?
१०. वर्षा के समय धोबी वस्त्रों को धोएगा; पर वे सूखेंगे नहीं।	वर्षाकाले रजकः वस्त्राणि क्षालयिष्यति, परं तानि न शोक्ष्यन्ति।

अभ्यास

(१) संस्कृत में अनुवाद कीजिए—

(१) आकाश में सूर्य तेज (तीव्रम्) चमकता है। (१) दोनों लड़कियाँ कक्षा में चमकेंगी। (३) सच्चे नेताओं के नाम चमकेंगे। (४) जल देने से वृक्ष नष्ट नहीं होगा। (५) मैं सोने को आग में शुद्ध करूँगा। (६) जल से अंग शुद्ध होते हैं। (७) मन सत्य से शुद्ध होता है। (८) विद्या और तप से प्राणी की आत्मा शुद्ध होती है। (९) बुद्धि ज्ञान से शुद्ध होती है।

(२) हिन्दी में अनुवाद कीजिए—

विमले नभसि ताराः दीव्यन्ति। प्रातः सायं संध्योपासनेन, परमात्मनः प्रसादेन, सदाचारेण च सर्वेषां मनांसि शाम्यन्ति। सत्यपि क्रोधे शांतविचारेण क्रुद्धानां जनानां चेतांसि अपि शाम्यन्ति। कपिलवस्तौ महाराजस्य शुद्धोदनस्य गेहे सिद्धार्थ-नामा पुत्रः अजायत। तस्य जन्मना राज्ञो मनोरथाः सम्पूर्णा इति विचार्य एव तस्य नाम सिद्धार्थ इति कृतम्। सिद्धार्थो यदा अजायत तदैव तस्य जननीं प्रसवपीड़ा अविध्यत्। तस्याः मरणानन्तरं शुद्धोदनस्यापरा भार्या सिद्धार्थमपोषयत्। महात्मा गांधी जवाहरलालश्च उभौ देशस्य स्वतंत्रतायै आंग्लैः सह चतुर्दशवर्ष-पर्यन्तं सततमयुध्येताम्।

(३) निम्नलिखित धातुओं के तत्तद् लकारों में सभी पुरुषों और वचनों में रूप लिखिए—

दिव्—लृट्, शम्—लट्, भ्रम्—लङ्, विध्—लृट्, नश्—विधिलिङ्, मुह्—लट्, सिव्—लट्, लृट्; सिध्—लोट्, विद्—लट्, युध्—लृट्, मन्—लट्, लङ्; खिद्—विधिलिङ्, क्लिश्—लृट्, लोट्।

(४) इनके मूल धातु, अर्थ, लकार, पुरुष तथा वचन लिखिए—

द्रुह्यति। खिद्यते। क्षोत्स्यति। द्रोहिष्यति। अविद्यत।

षष्ठ अध्याय

स्वादिगण

(क) स्वादिगण की धातुओं में 'श्नु' विकरण लगता है। श्नु के श् का लोप हो जाता है, 'नु' शेष रहता है। नु के 'उ' को कई स्थानों पर 'ओ' गुण हो जाता है।

आप् = प्राप्त करना

(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	आप्नोति	आप्नुतः	आप्नुवन्ति
मध्यम पुरुष	आप्नोषि	आप्नुथः	आप्नुथ
उत्तम पुरुष	आप्नोमि	आप्नुवः	आप्नुमः

लृट्—भविष्यत्काल

प्रथम पुरुष	आप्स्यति	आप्स्यतः	आप्स्यन्ति
मध्यम पुरुष	आप्स्यसि	आप्स्यथः	आप्स्यथ
उत्तम पुरुष	आप्स्यामि	आप्स्यावः	आप्स्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	आप्नोतु	आप्नुताम्	आप्नुवन्तु
मध्यम पुरुष	आप्नुहि	आप्नुतम्	आप्नुत
उत्तम पुरुष	आप्नवानि	आप्नवाव	आप्नवाम

लङ्—भूतकाल

प्रथम पुरुष	आप्नोत्	आप्नुताम्	आप्नुवन्
मध्यम पुरुष	आप्नोः	आप्नुतम्	आप्नुत
उत्तम पुरुष	आप्नवम्	आप्नुव	आप्नुम

विधिलिङ् लकार

प्रथम पुरुष	आप्नुयात्	आप्नुयाताम्	आप्नुयुः
मध्यम पुरुष	आप्नुयाः	आप्नुयातम्	आप्नुयात
उत्तम पुरुष	आप्नुयाम्	आप्नुयाव	आप्नुयाम

कृदन्तान्त रूप-रचना

आप्+क्त=आप्तः (आप्ता, आप्तम्) **प्रेरणार्थक—आपयति—ते**

आप्+क्तवत्—आप्तवान्
आप्+क्त्वा=आप्त्वा, प्राप्य
आप्+तुम्=आप्तुम्
आप्+तव्य=आप्तव्य:
आप्+अनीय=आपनीय:
आप्+शतृ—आप्नुवत् (न्)

कर्मवाच्य—आप्यते
सन्नन्त—ईप्सति
सोपसर्ग प्रयोग—
प्राप्नोति=पाता है।
समाप्नोति—समाप्त करता है।
अवाप्नोति—हस्तगत करता है।
व्याप्नोति—व्याप्त होता है।
श्रद्धया सत्यमाप्यते

शक्=समर्थ होना
(परस्मैपद)

5

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	शक्नोति	शक्नुत:	शक्नुवन्ति
मध्यम पुरुष	शक्नोषि	शक्नुथ:	शक्नुथ
उत्तम पुरुष	शक्नोमि	शक्नुव:	शक्नुम:

लृट्—भविष्यत्काल

प्रथम पुरुष	शक्ष्यति	शक्ष्यत:	शक्ष्यन्ति
मध्यम पुरुष	शक्ष्यसि	शक्ष्यथ:	शक्ष्यथ
उत्तम पुरुष	शक्ष्यासि	शक्ष्याव:	शक्ष्याम:

लोट्—आज्ञार्थक

प्रथम पुरुष	शक्नोतु	शक्नुताम्	शक्नुवन्तु
मध्यम पुरुष	शक्नुहि	शक्नुतम्	शक्नुत
उत्तम पुरुष	शक्नवानि	शक्नवाव	शक्नवाम

लङ्—भूतकाल

प्रथम पुरुष	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
मध्यम पुरुष	अशक्नो:	अशक्नुतम्	अशक्नुत
उत्तम पुरुष	अशक्नवम्	अशक्नुव	अशक्नुम

विधिलिङ् लकार

प्रथम पुरुष	शक्नुयात्	शक्नुयाताम्	शक्नुयु:
मध्यम पुरुष	शक्नुया:	शक्नुयातम्	शक्नुयात
उत्तम पुरुष	शक्नुयाम्	शक्नुयाव	शक्नुयाम

कृदन्तान्त रूप-रचना—
शक्+क्त=शक्त: (शक्ता, शक्तम्)
शक्+क्तवत्=शक्तवान् (-वती)
शक्+क्त्वा=शक्त्वा

प्रेरणार्थक—शाकयति—ते
कर्मवाच्य—शक्यते

शक्+तव्य=शक्तव्यः (शक्तव्या, शक्तव्यम्)
शक्+शतृ=शक्नुवन् (शक्नुवती, शक्नुवत्)
शक्+अनीयः=शकनीयः (शकनीया, शकनीयम्)

चि=इकट्ठा करना (फूल तोड़ना)
(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	चिनोति	चिनुतः	चिन्वन्ति
मध्यम पुरुष	चिनोषि	चिनुथः	चिनुथ
उत्तम पुरुष	चिनोमि	चिनुवः, चिन्वः	चिनुमः, चिन्मः

लृट्—भविष्यत्काल

प्रथम पुरुष	चेष्यति	चेष्यतः	चेष्यन्ति
मध्यम पुरुष	चेष्यसि	चेष्यथः	चेष्यथ
उत्तम पुरुष	चेष्यामि	चेष्यावः	चेष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	चिनोतु	चिनुताम्	चिन्वन्तु
मध्यम पुरुष	चिनु	चिनुतम्	चिनुत
उत्तम पुरुष	चिनवानि	चिनवाव	चिनवाम

लङ्—भूतकाल

प्रथम पुरुष	अचिनोत्	अचिनुताम्	अचिन्वन्
मध्यम पुरुष	अचिनोः	अचिनुतम्	अचिनुत
उत्तम पुरुष	अचिनवम्	अचिनुव	अचिनुम

विधिलिङ् लकार

प्रथम पुरुष	चिनुयात्	चिनुयाताम्	चिनुयुः
मध्यम पुरुष	चिनुयाः	चिनुयाताम्	चिनुयात
उत्तम पुरुष	चिनुयाम्	चिनुयाव	चिनुयाम

कृदन्तान्त रूप-रचना—

चि+क्त=चितः (चिता, चितम्)
चि+क्तवत्=चितवान्
चि+क्त्वा=चित्वा
चि+तुम्=चेतुम्
चि+तव्य=चेतव्यः(-व्या-व्यम्)
चि+शतृ=चिन्वन्
चि+अनीय=चयनीयः, चयनीया

प्रेरणार्थक—चाययति—ते
कर्मवाच्य—चीयते
सन्नन्त—चिचीषति

सोपसर्ग प्रयोग—

सम्+चि=संचिनोति=संचय करता है।
परि+चि=परिचिनोति=परिचय करता है।
निस्+चि=निश्चिनोति=निश्चय करता है।
अव+चि=अवचिनोति=इक्कट्ठा करता है।

चयनीयम् अप+चि=अपचिनोति=नष्ट करता है।
उप+चि=उपचिनोति=बढ़ाता है।

श्रु=सुनना

वक्तव्य—१. 'श्रु' धातु भ्वादिगण की है। किन्तु इसके रूप स्वादिगण की धातु के समान होते हैं। अतः इसे यहाँ दिया गया है।

२. 'श्रु' धातु को चार लकारों में 'शृ' आदेश और 'श्नु' प्रत्यय होता है। भविष्यत्काल को छोड़कर। जैसे—शृ+नु+ति=शृणोति।

श्रु=सुनना

(परस्मैपद)

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	शृणोति	शृणुतः	शृण्वन्ति
मध्यम पुरुष	शृणोषि	शृणुथः	शृणुथ
उत्तम पुरुष	शृणोमि	शृणुवः, शृण्वः	शृणुमः, शृण्मः

लृट्—भविष्यत्काल

प्रथम पुरुष	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति
मध्यम पुरुष	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ
उत्तम पुरुष	श्रोष्यामि	श्रोष्यावः	श्रोष्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	शृणोतु	शृणुताम्	शृण्वन्तु
मध्यम पुरुष	शृणु	शृणुतम्	शृणुत
उत्तम पुरुष	शृणवानि	शृणवाव	शृणवाम

लङ्—भूतकाल

प्रथम पुरुष	अशृणोत्	अशृणुताम्	अशृण्वन्
मध्यम पुरुष	अशृणोः	अशृणुतम्	अशृणुत
उत्तम पुरुष	अशृणवम्	अशृणुव, अशृण्व	अशृणुम, अशृण्म

विधिलिङ् लकार

प्रथम पुरुष	शृणुयात्	शृणुयाताम्	शृणुयुः
मध्यम पुरुष	शृणुयाः	शृणुयातम्	शृणुयात
उत्तम पुरुष	शृणुयाम्	शृणुयाव	शृणुयाम

कृदन्तान्त रूप-रचना—

श्रु+क्त=श्रुतः (श्रुता, श्रुतम्) — प्रेरणार्थक—श्रावयति—ते
श्रु+तुम्=श्रुतवान् (श्रुतवती) — कर्मवाच्य—श्रूयते
श्रु+क्त्वा=श्रुत्वा — सन्नन्त—शुश्रूषति (सेवा करता है)
श्रु+तुम्=श्रोतुम्

श्रु+तव्य=श्रोतव्यः (श्रोतव्या, श्रोतव्यम्) श्रु+शतृ=शृण्वन्
श्रु+अनीय=श्रवणीयः (श्रवणीया, श्रवणीयम्)

स्वादिगण की कुछ और मुख्य धातु

धु=हिलाना (प०) धुनोति, धविष्यति, धुनोतु, अधुनोत्, धुनुयात् ।
वृ=चुनना (प०) वृणोति, वरिष्यति, वृणोतु, अवृणोत्, वृणुयात् ।
(आ०) वृणुते, वरिष्यते, वृणुताम्, अवृणुत, वृण्वीत ।

सु (रस निकालना) सुनोति, सोष्यति, सुनोतु, असुनोत्, सुनुयात् । सावयति । सूयते । सुसूषति । सुत । सुत्वा । सोतुम् । सोतव्य । सवनीय । सुन्वत् ।

साध्=सिद्ध करना—साध्नोति, साधिष्यति, साध्नोतु, असाध्नोत् साध्नुयात् ।

उदाहरण—

१. आर्य सोम का रस निकालते थे और उसे पिया करते थे ।
आर्याः सोममसुन्वन् तं च अपिबन् ।

२. श्रोता लोग श्रद्धा से राम की कथा को सुनते थे ।
श्रोतारः श्रद्धया रामस्य कथामशृण्वन् ।

३. जो इस नीतिशास्त्र को नित्य पढ़ता है और सुनता है, वह कभी इन्द्र से भी पराभव को नहीं प्राप्त होता ।

अधीते य इदं नित्य नीतिशास्त्रं शृणोति च ।
न पराभवमाप्नोति शक्रादपि कदाचन ॥

४. योगी और तत्त्व को जानने वाला—देखता हुआ, सुनता हुआ, छूता हुआ, सूंघता हुआ, खाता हुआ, जाता हुआ, सोता हुआ, सांस लेता हुआ, कूदता हुआ, छोड़ता हुआ, ग्रहण करता हुआ, आँखें खोलता हुआ, आँखें बन्द करता हुआ—यही विचार करे कि इन्द्रियाँ इन्द्रियों के अर्थों (विषय) में प्रवृत्त ही रही हैं, मैं कुछ नहीं कर रहा ।

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ॥
प्लवन् विसृजन् गृह्णन् उन्मिषन् निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥

५. जो दूसरों का सम्मान करता है और मीठे वचन बोलता है, वह अवश्य ही अपना काम सिद्ध कर लेता है ।
यः परेषां सम्मानं करोति, मधुराणि च वचनानि वदति सोऽवश्यमेव निजं कार्यं साध्नोति ।

६. शकुन्तला, प्रियंवदा तथा अनसूया जब वन में फूल चुन रही थीं, उसी समय दुष्यन्त वहाँ आ गया ।
शकुन्तला, प्रियंवदा तथा अनसूया यदा वने पुष्पाणि अचिन्वन् तावदेव तत्र दुष्यन्तः प्रागच्छत् ।

७. आजकल तरुण-तरुणियाँ तरह-तरह से बालों को सजाते हैं।
अद्यत्वे तरुणाः तरुण्यश्च विविधैः प्रकारैः केशान् प्रसाध्नुवन्ति ।

८. एकदम कोई कार्य न करे, अविवेक बड़ी विपत्तियों का घर है, सोच-विचार कर काम करने वाले को, गुणों पर मुग्ध होने वाली संपत्तियाँ स्वयं वरण करती है ।

सहसा विदधीत न क्रियाम्, अविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणम्, गुणलुब्धाः स्वयमेव सम्पदः ॥

९. अज्ञान से ज्ञान ढक गया है, इससे प्राणी मोह को प्राप्त होते हैं ।
अज्ञानेनावृतं ज्ञानं, तेन मुह्यन्ति जन्तवः ।

अभ्यास

(१) संस्कृत में अनुवाद कीजिए—

(१) सुनो ! तुम कब फूल चुनोगे (तोड़ोगे) ? (२) तुम कब काम ठीक कर सकोगे ? (३) आलस्य में विद्या प्राप्त नहीं होती है । (४) शिष्य अपना पाठ ध्यान से सुनें । (५) सावित्री ने सत्यवान् को पति चुना (वृ) । (६) तुम जा सकते हो । (७) दुष्यन्त को पाकर शकुन्तला परम प्रसन्न हुई । (८) भाग्य विपरीत होने पर भी धैर्य न छोड़ना चाहिए, धैर्य से वह (मनुष्य) गति को पा ले । (९) बादल सूर्य को ढक लेते हैं ।

(२) निम्नलिखित धातुओं के निर्दिष्ट लकारों में रूप लिखिए—

सु—लृट् (परस्मैपद) । आप्—लट्, शक्—लङ्, विधिलिङ्, श्रु—लङ्, साध्—लोट् ।

(३) निम्नलिखित पदों के प्रकृति-प्रत्यय अर्थात् धातु, लकार, पुरुष और वचन बताइए—

शक्नुयाम् । सोष्यति । आप्स्यसि । सुन्वीत । अश्रृणोत् ।

सप्तम अध्याय

तुदादिगण

('अ' विकरण)

विकरण की दृष्टि से भ्वादि और तुदादि एक जैसे हैं, दोनों में 'अ' विकरण आता है। परन्तु भ्वादिगण के धातुओं के इ, उ तथा ऋ को गुण हो जाता है, और तुदादिगण में गुण नहीं होता। अन्य साधारण परिवर्तन रूपों में देखिए।

तुद्=कष्ट देना

परस्मैपदी धातु

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	तुदति	तुदतः	तुदन्ति
मध्यम पुरुष	तुदसि	तुदथः	तुदथ
उत्तम पुरुष	तुदामि	तुदावः	तुदामः

लृट्—भविष्यत्काल

प्रथम पुरुष	तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति
मध्यम पुरुष	तोत्स्यसि	तोत्स्यथः	तोत्स्यथ
उत्तम पुरुष	तोत्स्यामि	तोत्स्यावः	तोत्स्यामः

लोट्—आज्ञार्थक

प्रथम पुरुष	तुदतु	तुदताम्	तुदन्तु
मध्यम पुरुष	तुद	तुदतम्	तुदत
उत्तम पुरुष	तुदानि	तुदाव	तुदाम

लङ्—भूतकाल

प्रथम पुरुष	अतुदत्	अतुदताम्	अतुदन्
मध्यम पुरुष	अतुदः	अतुदतम्	अतुदत
उत्तम पुरुष	अतुदम्	अतुदाव	अतुदाम

विधिलिङ् लकार

प्रथम पुरुष	तुदेत्	तुदेताम्	तुदेयुः
मध्यम पुरुष	तुदेः	तुदेतम्	तुदेत
उत्तम पुरुष	तुदेयम्	तुदेव	तुदेम

कृदन्तान्त रूप-रचना—

तुद्+क्त=तुन्न:
तुद्+क्तवत्=तुन्नवान् (तुन्नवती)
तुद्+क्त्वा=तुत्वा
तुद्+तुम्=तोत्तुम्
तुद्+तव्य=तोत्तव्य: (तोत्तव्या, तोत्तव्यम्)
तुद्+अनीय=तोदनीय: (तोदनीया)
तुद्+शतृ=तुदन् (तुदन्ती)

प्रेरणार्थक—तोदयति-ते
कर्मवाच्य—तुद्यते
सन्नन्त—तुतुत्सति

इष्=इच्छा करना

इष् धातु को 'इच्छ' आदेश होता है भविष्यत्काल को छोड़कर। शतृ प्रत्यय लगने पर भी 'इष' को 'इच्छ' होता है।

लट्—वर्तमानकाल

प्रथम पुरुष	इच्छति	इच्छत:	इच्छन्ति
मध्यम पुरुष	इच्छसि	इच्छथ:	इच्छथ
उत्तम पुरुष	इच्छामि	इच्छाव:	इच्छाम:

लृट्—भविष्यत्काल

प्रथम पुरुष	एषिष्यति	एषिष्यत:	एषिष्यन्ति
मध्यम पुरुष	एषिष्यसि	एषिष्यथ:	एषिष्यथ
उत्तम पुरुष	एषिष्यामि	एषिष्याव:	एषिष्याम:

लोट्—आज्ञार्थक

प्रथम पुरुष	इच्छतु	इच्छताम्	इच्छन्तु
मध्यम पुरुष	इच्छ	इच्छतम्	इच्छत
उत्तम पुरुष	इच्छानि	इच्छाव	इच्छाम

लङ्—भूतकाल

प्रथम पुरुष	ऐच्छत्	ऐच्छताम्	ऐच्छन्
मध्यम पुरुष	ऐच्छ:	ऐच्छतम्	ऐच्छत
उत्तम पुरुष	ऐच्छम्	ऐच्छाव	ऐच्छाम

विधिलिङ् लकार

प्रथम पुरुष	इच्छेत्	इच्छेताम्	इच्छेयु:
मध्यम पुरुष	इच्छे:	इच्छेतम्	इच्छेथ
उत्तम पुरुष	इच्छेयम्	इच्छेव	इच्छेम

कृदन्तान्त रूप-रचना—

इष्+क्त=इष्ट: (इष्टा, इष्टम्)
इष्+क्तवत्=इष्टवान् (इष्टवती)
इष्+क्त्वा=इषित्वा, इष्ट्वा

प्रेरणार्थक—एषयति-ते
कर्मवाच्य—इष्यते
सन्नन्त—एषिषिति

इष् + तुम् = एषितुम्, एष्टुम्
इष् + तव्य = एष्टव्यः (एष्टव्या)
इष् + अनीय = एषणीयः (एषणीया)
इष् + शतृ = इच्छन् (इच्छन्ती)

सोपसर्ग प्रयोग—
अनु + इष् = (ढूंढ़ना) अन्विच्छति
(उद्योगमन्विच्छति चाप्रमत्तः)

स्पृश् = छूना

लट्—वर्तमानकाल

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	स्पृशति	स्पृशतः	स्पृशन्ति
म० पु०	स्पृशसि	स्पृशथः	स्पृशथ
उ० पु०	स्पृशामि	स्पृशावः	स्पृशामः

ज्ञातव्य—स्पृश् धातु की 'ऋ' को भविष्यत्काल में विकल्प से र् हो जाता है। जहाँ र् नहीं होता वहाँ ऋ को 'अर्' गुण हो जाता है। अतः दो प्रकार के रूप बनते हैं।

लृट्—भविष्यत्काल

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	स्पर्क्ष्यति	स्पर्क्ष्यतः	स्पर्क्ष्यन्ति
म० पु०	स्पर्क्ष्यसि	स्पर्क्ष्यथः	स्पर्क्ष्यथ
उ० पु०	स्पर्क्ष्यामि	स्पर्क्ष्यावः	स्पर्क्ष्यामः

अथवा

प्र० पु०	स्प्रक्ष्यति	स्प्रक्ष्यतः	स्प्रक्ष्यन्ति
म० पु०	स्प्रक्ष्यसि	स्प्रक्ष्यथः	स्प्रक्ष्यथ
उ० पु०	स्प्रक्ष्यामि	स्प्रक्ष्यावः	स्प्रक्ष्यामः

लोट्—आज्ञार्थक

प्र० पु०	स्पृशतु	स्पृशताम्	स्पृशन्तु
म० पु०	स्पृश	स्पृशतम्	स्पृशत
उ० पु०	स्पृशानि	स्पृशाव	स्पृशाम

लङ्—भूतकाल

प्र० पु०	अस्पृशत्	अस्पृशताम्	अस्पृशन्
म० पु०	अस्पृशः	अस्पृशतम्	अस्पृशत
उ० पु०	अस्पृशम्	अस्पृशाव	अस्पृशाम

विधिलिङ् लकार

प्र० पु०	स्पृशेत्	स्पृशेताम्	स्पृशेयुः
म० पु०	स्पृशेः	स्पृशेतम्	स्पृशेत
उ० पु०	स्पृशेयम्	स्पृशेव	स्पृशेम

कृदन्तान्त रूप-रचना—
स्पृश् + क्त = स्पृष्टः (स्पृष्टा, स्पृष्टम्)   प्रेरणार्थक—स्पर्शयति—ते

स्पृश् + क्तवत् = स्पृष्टवान् (-वती) कर्मवाच्य—स्पृश्यते
स्पृश् + क्त्वा = स्पृष्ट्वा सोपसर्ग प्रयोग—
स्पृश् + तुम् = स्प्रष्टुम् अप + स्पृश् = अपस्पृशति = मुँ...
स्पृश् + तव्य — स्प्रष्टव्यः धोता है, आचमन करता है।
स्पृश् + अनीय = स्पर्शनीयः
स्पृश् + शतृ = स्पृशन् (स्पृशन्ती, स्पृशत्)

छिप् = फेंकना

क्षिपति। क्षेप्स्यति। क्षिपतु। अक्षिपत्। क्षिपेत्।
क्षिप् + क्त = क्षिप्तः प्रेरणार्थक—क्षेपयति—ते
क्षिप् + क्तवत् = क्षिप्तवान् कर्मवाच्य = क्षिप्यते
क्षिप् + क्त्वा = क्षिप्त्वा, प्रक्षिप्य सोपसर्ग प्रयोग—
क्षिप् + तुम् = क्षेप्तुम् अधिक्षिपति = झिड़कता है।
क्षिप् + तव्य = क्षेप्तव्यः (पुं०) प्रक्षिपति = फेंकता है या मिलावट
क्षेप्तव्या (स्त्री०) करता है।
